## तृज्वत् क्रोष्टुः । (९५/२७४)

क्रोष्टुशब्दः तुन्प्रत्ययान्तः सञ्ज्ञाशब्दः सर्वनामस्थाने[1]ऽसम्बुद्धौ परतः तृज्वद् भवति । तृजन्तस्य यद् रूपं तदस्य भवति इत्यर्थः । रूपातिदेशोऽयम् । प्रत्यासत्तेश्च क्रुशेरेव तृजन्तस्य यद् रूपं तदतिदिश्यते । तच्च क्रोष्टृ इत्येतदन्तोदात्तम्[2] । क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । क्रोष्टारम्, क्रोष्टारौ । सर्वनामस्थाने इत्येव, क्रोष्टून् । असम्बुद्धौ इत्येव, हे क्रोष्टो ॥

## स्त्रियां च । (९६/३०५)

असर्वनामस्थानार्थमारम्भः । स्त्रियां च क्रोष्टुशब्दस्य तृज्वद् भवति । क्रोष्ट्री । क्रोष्ट्रीभ्याम् । क्रोष्ट्रीभिः । क्रोष्टुशब्दं केचिद् गौरादिषु [3]पठन्ति, ते[4] ङीषि प्रत्यये तृज्वद्भावं कुर्वन्ति । तेषां पञ्चभिः क्रोष्ट्रीभिः क्रीतैः पञ्चक्रोष्टृभी रथैः इति स्त्रीशब्दस्य लुकि कृते न सिध्यति, तत्र प्रतिविधेयम् । ये तु गौरादिषु न पठन्ति, तेषां स्त्रियाम् इत्यर्थनिर्देशः, स्त्रियां वर्तमानः क्रोष्टुशब्दः तृज्वद् भवति । कृतेऽतिदेशे 'ऋन्नेभ्यो ङीप्' (४.१.५/३०६) इति ङीप्प्रत्ययः । तत्र 'उदात्तयणो हल्पूर्वात्' (६.१.१७४/३७२०) इत्यन्तोदात्त एव क्रोष्ट्रीशब्दो [5]भवति ॥

## विभाषा तृतीयादिष्वचि । (९७/२७८)

तृतीयादिषु [6]विभक्तिषु अजादिषु [7]क्रोष्टुर्विभाषा तृज्वद् भवति । क्रोष्ट्रा, क्रोष्टुना । क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः । क्रोष्टरि, क्रोष्टौ । क्रोष्ट्रोः, क्रोष्ट्वोः । तृतीयादिषु इति किम् ? क्रोष्टून् । अचि इति किम् ? क्रोष्टुभ्याम् । क्रोष्टुभिः ।

[८२८] तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम्नुटौ भवतः । (म. भा. ३.२७६)

प्रियक्रोष्टुने अरण्याय । हतक्रोष्टुने [8]वृषलकुलाय । नुट् – क्रोष्टूनाम् ॥

## चतुरनडुहोरामुदात्तः । (९८/३३१)

चतुर् अनडुह् इत्येतयोः सर्वनामस्थाने परतः आम् आगमो भवति, स चोदात्तः । चत्वारः । अनड्वान्, अनड्वाहौ, अनड्वाहः । अनड्वाहम् । तदन्तविधिरत्रेष्यते । प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । प्रियानड्वान्, प्रियानड्वाहौ, प्रियानड्वाहः ।

[८२९] अनडुहः स्त्रियां वेति वक्तव्यम् । (म. भा. ३.२७६)

अनडुही, अनड्वाही । [9]गौरादिपाठात् सिद्धम् ॥

---

1. सम्बुद्धिवर्जिते ह. 2. वर्तते इत्यधिकम् क. ह. 3. वदन्ति ब. ड. 4. ङीष्प्रत्यये क, ते नास्ति ह. 5. भवति नास्ति ब. क. 6. विभक्तिषु नास्ति क. 7. परतः क्रोष्टुशब्दः ब. क. इ. ह. 8. भवाय क. 9. गौरादिषु ह.